# Devaih Kritam 13 Vishnu Stotram

# દેવૈઃ કૃતં ૧૩ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam 13 Vishnu Stotram

File name : devaiHkRRitaM13viShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 6/9/21-27||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 23, 2025

*sanskritdocuments.org*

Devaih Kritam 13 Vishnu Stotram

# દેવૈઃ કૃતં ૧૩ વિષ્ણુસ્તોત્રમ્

દેવા ઊચુઃ ।
વાય્વમ્બરાગ્ન્યપ્ક્ષિતયસ્ત્રિલોકા
બ્રહ્માદયો યે વયમુદ્વિજન્તઃ ।
હરામ યસ્મૈ બલિમન્તકોઽસૌ
બિભેતિ યસ્માદરણં તતો નઃ ॥ ૨૧॥

અવિસ્મિતં તં પરિપૂર્ણકામં
સ્વેનૈવ લાભેન સમં પ્રશાન્તમ્ ।
વિનોપસર્પત્યપરં હિ બાલિશઃ
શ્વલાઙ્ગુલેનાતિતિતર્તિ સિન્ધુમ્ ॥ ૨૨॥

યસ્યોરુશૃઙ્ગે જગતીં સ્વનાવં
મનુર્યથાઽઽબધ્ય તતાર દુર્ગમ્ ।
સ એવ નસ્ત્વાષ્ટ્રભયાદ્દુરન્તા-
ત્ત્રાતાઽઽશ્રિતાન્ વારિચરોઽપિ નૂનમ્ ॥ ૨૩॥

પુરા સ્વયમ્ભૂરપિ સંયમામ્ભ-
સ્યુદીર્ણવાતોર્મિરવૈઃ કરાલે ।
એકોઽરવિન્દાત્પતિતસ્તતાર
તસ્માદ્ભયાદ્યેન સ નોઽસ્તુ પારઃ ॥ ૨૪॥

ય એક ઈશો નિજમાયયા નઃ
સસર્જ યેનાનુસૃજામ વિશ્વમ્ ।
વયં ન યસ્યાપિ પુરઃ સમીહતઃ
પશ્યામ લિઙ્ગં પૃથગીશમાનિનઃ ॥ ૨૫॥

યો નઃ સપત્નૈર્ભૃશમર્દ્યમાનાન્
દેવર્ષિતિર્યઙ્નૃષુ નિત્ય એવ ।
કૃતાવતારસ્તનુભિઃ સ્વમાયયા

કૃત્વાઽઽત્મસાત્પાતિ યુગે યુગે ચ ॥ ૨૬॥

તમેવ દેવં વયમાત્મદૈવતં
પરં પ્રધાનં પુરુષં વિશ્વમન્યમ્ ।
વ્રજામ સર્વે શરણં શરણ્યં
સ્વાનાં સ નો ધાસ્યતિ શં મહાત્મા ॥ ૨૭॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ષષ્ઠસ્કન્ધે નવમાધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૬/૯/૨૧-૨૭॥

bhAgavatapurANa . adhyAya 6/9/21-27..

Proofread by PSA Easwaran

*Devaih Kritam 13 Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*